# annapUrNAstotram 2

# અન્નપૂર્ણાસ્તોત્રમ્ ૨

## Document Information

Text title : annapurnaastotram 2

File name : annapUrNAstotramannadAkalpa.itx

Category : devii, pArvatI, annapUrNa, stotra, devI

Location : doc_devii

Transliterated by : Pranav Tendulkar pranav.tendulkar at gmail.com

Proofread by : Pranav Tendulkar, NA, anonymous456an at gmail.com

Source : Annadakalpatantra

Latest update : June 16, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

annapUrNAstotram 2

# અન્નપૂર્ણાસ્તોત્રમ્ ૨

શ્રીબ્રહ્મભૈરવ ઉવાચ -
સાધનાનિ ચ સર્વાણિ શ્રુતાનિ તવ સુવ્રત ।
ઇદાનીં વદ દેવેશ સ્તોત્રાણિ કવચાનિ ચ ॥ ૧॥

શ્રીશિવ ઉવાચ -
કથયામિ તવ સ્નેહાત્ સ્તોત્રાણિ કવચાનિ ચ ।
અન્નપૂર્ણાપ્રીતિદાનિ સાવધાનોઽવધારય ॥ ૨॥

હ્રીંકારં પ્રથમં નમો ભગવતિ સ્વાહાવસાનાં ધ્રુવં
    મન્ત્રં સપ્તદશાક્ષરં જપતિ તે માહેશ્વરિ પ્રોક્ષિતમ્ ।
ધ્યાયેઽમ્બે તરુણારુણં તવ વપુર્નિત્યાન્નપૂર્ણે શિવે
    ગેહે તસ્ય વિરાજતે સરભસં દિવ્યાન્નરાશિર્ધ્રુવમ્ ॥ ૩॥

હ્રીંકારમુર્તિં કમનીયવક્ત્રાં ચન્દ્રાઙ્કુરેખાન્વિતભાલભાગામ્ ।
ઈશાન્કાન્તાં પ્રણમામિ નિત્યાં લક્ષ્મીવિલાસાસ્પદપાદપીઠામ્ ॥ ૪॥

નમોઽસ્તુ તુભ્યં ગિરિરાજકન્યે નમોઽસ્તુ કામાન્તકવલ્લભાયૈ ।
નમોઽસ્તુ પઙ્કેરુહલોચનાયૈ નમઃ શિવાયૈ શશિભૂષણાયૈ ॥ ૫॥

વામે કરેઽમૃતમયં કલશઞ્ચ દક્ષે
    સ્વર્ણાઙ્કિતાં નનુ પલ્લાન્નમયીઞ્ચ દર્વીમ્ ।
ચિત્રાં સુવર્ણવસનાં ગિરિશસ્ય કાન્તાં
    સત્પદ્મપત્રનયનાં મનસાહમીડે ॥ ૬॥

વામે માણિક્યપાત્રં મધુરસભરિતં બિભ્રતીં પાણિપદ્મે
    દિવ્યૈરન્નૈઃ પ્રપૂર્ણાં મણિમયવલયે દક્ષિણે રત્નદર્વીમ્ ।
રક્તાઙ્ગી પીનતુઙ્ગસ્તનભરવિલસંસ્તારહારાં ત્રિનેત્રાં
    વન્દે પૂર્ણેન્દુબિમ્બપ્રતિનિધિવદનામમ્બિકામન્નપૂર્ણામ્ ॥ ૭॥

ભગવતિ ભવરોગાત્ પીડિતં દુષ્કૃતોત્થાત્

સુતદુહિતૃકલત્રોપદ્રવેણાનુજાતમ્ ।
વિલસદમૃતદૃષ્ટ્યા વીક્ષ્ય વિભ્રાન્તચિત્તમ્
સકલભુવનમાતસ્ત્રાહિ મામન્નપૂર્ણે ॥ ૮॥

માહેશ્વરીમાશ્રિતકલ્પવલ્લીમહં ભવચ્છેદકરીં ભવાનીમ્ ।
ક્ષુધાર્તજાયાતનયાભ્યુપેતસ્ત્વામન્નપૂર્ણાં શરણં પ્રપદ્યે ॥ ૯॥

દારિદ્ર્યદાવાનલદહ્યમાનં નમોઽન્નપૂર્ણે ગિરિરાજકન્યે ।
કૃપામ્બુવર્ષૈરભિષિઞ્ચ ત્વં માં ત્વત્પાદપદ્માર્પિતચિત્તવૃત્તિમ્ ॥ ૧૦॥

ઇત્યન્નપૂર્ણાસ્તવરત્નમેતચ્છ્લોકાષ્ટકં યઃ પઠતીહ ભક્ત્યા ।
તસ્મૈ દદાત્યન્નસમૃદ્ધિરાશિં શ્રિયઞ્ચ વિદ્યાઞ્ચ પરત્ર મુક્તિમ્ ॥ ૧૧॥

ઇત્યન્નદાકલ્પે ષોડશપટલે અન્નપૂર્ણાસ્તોત્રં સમાપ્તમ્ ।

Encoded by Pranav Tendulkar pranav.tendulkar at gmail.com

Proforead by Pranav Tendulkar, NA, , anonymous456an at gmail.com

---

*annapUrNAstotram 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*